

# APPENDICES


| No. | | Page |
|---|---|---|
| Appendix – 1 | Lata Region Map. | 01 |
| Appendix – 1 | Bharuch District Map. | 02 |
| Appendix – 3 | Nemijinastavānam. | 03 |
| Appendix – 4 | Chaitya Paripati Stava. | 08 |
| Appendix – 5 | Vastupala Tejapala Prasasti. | 11 |
| Appendix – 6 | Gurjardesh Rajavanshavali. | 20 |
| Appendix – 7 | Genealogy of Harji (Astrologer). | 26 |
| Appendix – 8 | Genealogy of Dinanath family. | 27 |
| Appendix – 9 | Epigraphas and Stone incriptions. | 28 |



ભારત
પ્રાચીન ગુજરાત
હિ
મા
દ્રિ
હડપ્પા
સિંધુ નદી
મોહેન-જો-દડો
મરુભૂમિ
શ્રીમાલ-ભિલ્લમાલ
સરસ્વતી નદી
ગંગા નદી
યમુના નદી
કાન્યકુબ્જ
કચ્છ
કચ્છનો અખાત
સૌરાષ્ટ્ર
દધિપદ્ર
નાંદીપુરી
મહી નદી
નર્મદા નદી
ભૃગુકચ્છ
લાટ
તાપી નદી
સોમનાથ
દ્વારવતી
નવસારિકા
સમુદ્ર
આનન્દપર (વડનગર)
(દીવ)
(ખેડા)
(જૂનાગઢ)
(દોહદ)
(દ્વારકા)
ધવલક્ક (ધોળકા)
નાંદીપુરી (નાદોદ)
(ભરૂચ)
વલભી (વળા)
શ્રીમાલ-ભિલ્લમાલ (ભિન્નમાલ)
(સોમનાથ-પ્રભાસ પાટણ)
(ખંભાત)


भरुच
पैमाना : १ सेमी = ७५ किमी
N
वडोदरा
पादरा
डभोई
संखेडा
नसवाडी
करजण
जंबुसर
आमोद
भरूच
अंकलेश्वर
जघडिआ
वालीया
हांसोट
सीनोर
राजपीपला
टीलकवाडा
डेडियापाडा
सागबारा
उमरपाडा
मांगरोल
ओलपाड
खंभातकी खाडी
महाराष्ट्र
उकाई पुनर्वसाहत क्र.३
उकाई पुनर्वसाहत क्र.४
माडवी की ओर

## श्री विजयसिंहाचार्यविरचितं
## श्री नेमिजिनस्तवनम् ।

नेमिः समाहितधियां यदि दैवयोगा-
    च्चित्ते परिस्फुरति नीलतमालकान्तिः।
तेषां कुठार इव दूरनिबध्द मूल-
    दुष्कर्मवल्लिगहनं सहसा च्छिनत्ति ।। १ ।।

जय त्वं देवेश त्रिभुवनपते शान्तहृदय
    त्रिलोकीसङ्कल्पद्रुमवरकृपाकार वरद ।
समुद्धर्तुं मिथ्याजलधिलहरितः क्षणमितो
    मयि द्रोणीदीर्घां जिन सकरुणां निक्षिप दृशम् ।। २ ।।

पूजापत्रचयैर्निरन्तरलसत्पत्रावलीमण्डितो
    नानावर्णसुगन्धिपुष्पनिकरैः सर्वत्र यः पुष्पितः ।
पादान्ते परिणामसुन्दरफलैः सम्भूषितः सर्वतो
    नेमिः कल्पतरुः सतामविकलं देयात् तदग्र्यं फलम् ।।३।।

आश्चर्यं भूवनैकभूषण भवान् कल्पद्रुमः पण्डितैः
    सिक्तो भक्तिजलेन तेषु कुरुते क्षेमाङ्कुरं यत् किल ।
एतस्मादपि चित्रमेतदपरं नेमे दुरापं सुरै-
    रुच्चैर्यत् तदपि प्रशान्तमतिभिर्नम्रैः फलं प्राप्यते ।।४।।

उद्यन्मोहमहान्धकारतरणिस्त्रैलोक्यचिन्तामणि-
    र्नित्यान्दपदक्रयाणविपणिर्लोकाग्रभूषामणिः ।

निर्वाणैकपुरप्रयाणसरणिः सज्ज्योतिरेकारणी

दिश्यान्नेमिजिनः स किङ्करसुरश्रेणिः सतां मङ्गलम् ।।५।।

धन्यैः कैश्चन धीरसंस्तुतगुणः पापैः पुनर्नन्दित-

स्तुल्या तेषु तव प्रवृत्तिरिति ते श्लाघ्यैव नीरागता ।

तेषां यत् तु शुभाशुभेन घटना तत्रासि हेतुः कथं

को जात्यथवा जगत तत्रयपते तत्वं जिन त्वादृशम् ।।६।।

देव त्वं गतबन्धनः प्रदर्लश्नि: शेषकर्मस्थितिः

पूर्वस्वीकृतभग्नदुष्टफलकः पोतस्तथाप्यद्भुतम् ।

त्वमाश्रित्य गतागतैर्विरहितं संसारवारांनिधिं

तीर्णाः केऽपि तरन्ति केचन पुनश्चित्रं तरिष्यन्ति च ।।७।।

रामाक्रान्ततनुस्तथा बहुमरुत्संसर्गतश्चञ्चलः

किञ्चान्तर्ज्वलति प्रकाममपरं कुग्राहसत्त्वाकुलः ।

अम्भोधिश्चुलुकाकृतिः कथमसौ त्रैलोक्यविस्तारिण-

स्ते साम्यं लभते सुवृत्तविलासंन्मुक्तालयो यद्यपि ।।८।।

मूर्तिस्ते जगतां महार्त्तिशमिनी मूर्त्तिर्जनानन्दिनी

मूर्त्तिर्वाञ्छितदानकल्पलतिका मूर्त्तिः सुधास्यन्दिनी ।

संसाराम्बुनिधिं तरीतुमनसां मूर्तिर्दृढा नौरियं

मूर्त्तिर्नेत्रपथं गता जिनपते किं किं न कर्तुं क्षमा ।।९।।

किं तत्रास्ति निरन्तरं न भवतः सङ्गः कुरङ्गीदृशां

किं वा तत्र विभो पयोधरपरिष्वङ्गोऽपि नाल्हादकः ।

यन्मामत्र विहाय निर्वृतिमना नाथोज्ज्ञयन्ते गतः

पायाद् वोऽमिहितः स भोजसुतया देवः शिवानन्दनः ।।१०।।

अत्यन्तं यदि जीवितादपि विभो नीरागता वल्लभा

तत् किं सिध्दवधूसमागमविधौ त्वं खिद्यसेऽहर्निशम् ।

यद्येतद् द्वितयं प्रिं वद मया कस्तेऽपराधः कृतो

जल्पन्ती गणितोग्रसेनतनया नो येन सोऽस्तु श्रिये ।।११।।

श्रीमान्नीलतमालकज्जलघनच्छायः सुधाशीतलो

व्यालोलक्षणदीर्धिकः प्रतिपदं हेमांम्बुजैः पूजितः ।

त्वं संसारमरो निरन्तरमहादुःखाकुले देहिनां

मार्गः स्वर्गपुरस्य नाथ विवतः किंवाऽपवर्गस्य च ।।१२।।

शुक्लध्यानसरो विनीलनलिनाकारोऽपवर्गद्रुम-

च्छायाबन्ध इवैककेवलिदृशोर्मध्ये स्फुरत्तारकः ।

नीलाश्मप्रभवत्तदेकममलं पात्रं परं ज्योतिषः

कुर्याद् योगबलच्छविः सुकृतिनां नेमिर्विशु€ पदम् ।।१३।।

आकर्णायतयोर्विनीलनलिनश्वेताम्बुजाप्तश्रियोः

किञ्चिन्मन्थरयोर्मनाग् मसृणयोरुद्वृत्तसत्तारयोः ।

कारुण्यामृतसारिणीसरलयोः संसन्धयोः सर्वदा

नेमेर्यामि बलिं दृशोऽस्तु वसुधाश्वेतच्छटाच्छाययोः ।।१४।।

त्रैलोक्यालम्बदण्डः परमपदगृहारोहनिःश्रेणिदण्डः

कन्दर्पाघातदण्डो भवजलधिपतेर्देहिनां सेतुदण्डः ।

दोर्दण्डः पातु नेमेर्नरकपुरमहाद्वाररोधैकदण्डः

स€र्माधारदण्डो हरिनिबिडकरात् कर्षणान्दोलदण्डः।।१५।।

एते मूढधियो वदन्ति किमपि स्वामिन मदीयं मन-

स्त्वेवं कल्पयते त्वमेव भुवने देवाधिदेवः परम् ।

यत्रैतानि जगन्ति जाविविधव्यावर्त्तनोद्वर्त्तन-

व्यापाराणि परिस्फुरन्ति सततं विज्ञानरुपे त्वयि ।।१६।।

रागद्वेषविसंस्थुलेन मनसा यत् किञ्चिदासेवितं

जन्मन्यत्र परत्र वा गतिवशात् तैस्तैरुपायैः स्तुमः ।

तत् सर्व जिनचन्द्र सर्वगमहाज्योतिःस्वरुपे त्वयि

प्रत्यासत्यमुपागते हृदिं कथं बध्नाति नित्यस्थितिम् ।।१७।।

यस्यते शशिभास्करप्रभृतयः सूक्ष्माणुगः सर्वगं

यल्लोकत्रयभास्करद्युति पुनः सूक्ष्मं न यद्वीक्ष्यते ।

यत् कर्मेन्धनदाहदारुणमिदं निर्वाणगं देहिनां

तज्ज्योतिर्जगदेकवन्द्य गुणिभिस्त्वं योगिभिर्गीयसे ।।१८।।

यत्रैष स्मरभिल्लभल्लिनिकरः कल्पान्तकालानल-

स्पर्€क्रोधदवानलः पुनरियं यस्मिन् जरा राक्षसी ।

यत्रायाति पुरो महाभयंकरः पञ्चत्वपञ्चानन-

स्तेषां तद् भवकाननं भयंकरं त्राता न येषां भवान् ।।१९।।

देवाकृष्य करेण केसरीपदं दन्ती कपोलस्थलीं

कण्डूयत्यहिरेष बभ्रुपुरतो मार्गं निरुध्य स्थतः ।

व्याघ्रं व्यात्तविशालवक्त्रकुहरं जिघ्रत्यजस्रं मृगो

यत्रैवं पशवः प्रशान्तमनसस्तामर्थये त्वद्भुवम् ।।२०।।

चेतस्तावदपारनिर्मलगुणाम्भोधौ निमग्नं मुदा

चक्षुस्तावद्वदनावलोकनवशाद् बाष्पम्बुपूरप्लुतम् ।

नो वाचामिह मादृशामहरहः प्राप्तोऽप्यनल्पैनसा

न ध्यातो न विलोकितो न च जिन स्तोत्रैः स्तुतः स्वेच्छया ।।२१।।

निःसङ्गोऽपि निरुत्सुकोऽपि निरहङ्कारोऽपि निर्वागपि

त्यक्त्वा शेषममत्वबुध्दिरपि यत्त्वं वीतरागोऽपि सन् ।

त्वं स्वामित्वमनिन्दितो गुरुरसि त्वं मे पिता जीवितं

मिथ्यास्मिŽापि चेन्ममास्ति गदिते त्वन्मे प्रमाणं भवान् ।।२२।।

सम्यग्ज्ञानविहीनमूढमतयस्तत्त्वानभिज्ञा वयं

तत्त्वप्रीतिमतो नरस्य नियतं मुक्तिश्चरित्रात्मनः ।

हेतुः सर्वसमीहितस्य भवतः पादप्रसादः परं

तस्माद् देव भवे भवे मम भवेत् त्वत्पादसेवासुखम् ।।२३।।

इति जगति दुरापाः कस्यचित् पुण्यभाजो

बहुसुकृतसमृ€्या सम्भवन्त्येव वाचः ।

जिनपतिरपि यासां गोचरे विश्वनाथो

दुरितविजयसिंहः सोऽस्तु नेमिः शिवाय ।।२४।।

## श्रीसङ्गमसूरिकृतम्
## श्रीचैत्यपरिपाटीस्तवनम्

(आर्यावृत्तम्)

पञ्चानुत्तरशरणा ग्रैवेयककल्पतल्पगत सदनाः ।
ज्योतिष्कव्यन्तर भवनवासिनी जयति जिनपंराजी ॥१॥

वैताढ्यकुलाचल नागदन्तवक्षारकूटशिखरेषु ।
ह्रद-कुण्ड-वर्ष -सागर-नदीषु जयताज्जिनवराली ॥२॥

इषुकारमानुषोत्तरनन्दीश्वररु चककुण्डल नगेषु ।
सिद्धालयेषु जीयाज्जिनपद्धतिरिद्धत त्त्वासौ ॥३॥

यत्र वहुकोटिसङ्ख्याः सिद्धिमगुः पुण्डरीकमुख्यजिनाः ।
तीर्थानामादिपदं स जयति शत्रुञ्जयगिरीशः ॥४॥

अष्टापदाद्रिशिखरे निजनिजसंस्थानमानवर्णधराः ।
भरतेश्वरनृपरचिताः सद्रत्नमया जयन्तु जिनाः ॥५॥

विंशत्यातीर्थकरैरजिताद्यैर्यत् शिवपदं प्राप्तम् ।
देवकृतस्तूपगणः स जयति सम्मेतगिरिराजः ॥६॥

ऋषभजिनपदस्थाने बाहुबलिविनिर्मितं सहस्त्रारं ।
रत्नमयधर्मचक्रं तक्षशिला पुरवरे जयति ॥७॥

मधुरापुरी प्रतिष्ठः सुपार्श्वजिनः कालसम्भवो जयति ।
अद्यापि सुराभ्यर्च्यः श्रीदेव विनिर्मितस्तूपः ॥८॥

ब्रह्मेन्द्रदशानन रामचन्द्रमुख्यैः प्रपूजितो जयति ।
अंगदिकानगरस्थे जिनबिम्बे दिव्यरत्नमये ॥९॥

यस्तिष्ठति वरवेश्मनि साद्र्धाभिर्द्रविणकोटिभिस्तिसृभिः ।
निर्मापितोऽ( ऽ )मराज्ञा गोपगिरौ जयति जिनवीरः ॥१०॥

हरिवंशभूषणमणिर्भृगुकच्छे नर्मदासरित्तीरे ।
श्रीशकुनिकाविहारे मुनिसुव्रतजिनपतिर्जयति ॥११॥

नेमेः कल्याणकत्रिकम भवन्निष्क्रमणममरमुख्यकृतं ।
यस्मिन्नसौ महात्मारैवतकमहागिरिर्जयति ॥१२॥

मोढेरपुर निवासी ब्रह्मोपपदेन शान्तिनारचितः ।
स्वयमेव सप्तहस्तः श्रीवीरजिनेश्वरो जयति ॥१३॥

श्रीवलभीपुरनिर्गत रथाधिरूढो जिनो महावीरः ।
अश्वयुजिपूर्णिमास्यां श्रीमालपुरस्थितो जयति ॥१४॥
(उदधिजलमध्यलब्धं प्रवहणमानीतमतिशयसुरम्यम् ।
वटपद्रकनगरस्थं जिनबिंबं नौमि रत्नमयम् ॥ )

जयतिसदतिशययुक्त स्तम्भनक निकेतनो जिनःपार्श्वः ।
पायात् प्रतिकृतिपूज्यो मुण्डस्थल संस्थितो वीरः ॥१५॥

(अमरन विनतचरणाः सकलाधिव्याधिदुरितशत हरणा ।
स्तंभनकपुरवरस्थो श्रीपार्श्वजिनेश्वरो जयति ॥)

नमिविनमिकुलान्वयभिर्विद्याधरनाथ कालिकाचार्यैः ।
काशहृदाख्येनगरे प्रतिष्ठितो जयति जिनवृषभः ॥१६॥

पाण्डवमात्राकुन्त्या संजाते श्रीयुधिष्ठिरे पुत्रे ।
श्रीचन्द्रप्रभनाथः प्रतिष्ठितो जयति नाशिक्ये ॥१७॥

नागेन्द्र-चन्द्र-निर्वृत्ति-विद्याधर सकलसङ्घमुख्येन ।
सोपारक प्रतिष्ठितो युगादिजिनपुङ्गवो जयति ॥१८॥

त्रिन्लनरेन्द्रकृतस्तुतिऋषभोऽर्बुदनगविशेषको जयति ।
जयतीह जगति शान्तिः श्रीगोकुलवासि कृतपूजः ॥१९॥

(अर्बुदशिखरे रम्ये श्रीऋषभजिनेश्वरस्य प्रतिबिम्बम् ।
विमलेन विमलमतिना जयति कृतं त्रिदशकृतपूजम् ॥)

(श्रीजाबाल[लि]पुर स्थितकाञ्चनगिरिशिखरशीर्षमाणिक्यम् ।
सकलकलिकालेऽपि श्रीपार्श्वजिनेश्वरो जयति ॥)

कलिकुण्डकुक्कुटेश्वरः चम्पा-श्रावस्ति[११]-गजपुरायोध्याः ।
वैभारगिरि-पावा -जयन्ति पुण्यानि तीर्थानि ॥२०॥

ॐकारनगर -वायट -जाल्योधर -चित्रकूट-सत्यपुरे ।
ब्रह्माण -पल्लिकादिषु ऋषभादिजिना जयन्त्यनघाः ॥२१॥

इत्येवमन्यदपि यत्तीर्थां भुवनत्रयेऽपि तीर्थकृताम् ।
तद्बिम्बानि च वन्दे श्रीसङ्गमसूरि विनुतानि ॥२२॥

(मालिनी)

(अवनितलगतानां कृत्रिमाऽकृत्रिमाणां वरभुवनगतानां दिव्यवैमानिकानां ।
इहमनुजकृतानां देवराजार्चितानां जिनवरभवनानां भावतोऽहं नमामि

# श्रीवस्तुपालतेजःपालप्रशस्तिः

श्रेयः श्रीमुनिसुव्रतः स तनुतां यो मन्दरागस्तले
तन्वानः कमठाधिनाथमसृतोद्गारैकधौरेयकः ।
निर्मथ्यैनमधर्मकर्मलहरीपूरैरपारं भवा-
कूपारं पुरुषोत्तमाय न तमां दत्ते स्म कस्मै श्रियम् ॥ १ ॥
यस्मै रश्मिभरो गभीरिमगुणक्रान्तेन कल्लोलिनी-
कान्तेनाञ्जनपुञ्जमञ्जिमजयी शङ्के स्वकीयोऽर्पितः ।
यस्यैव क्रमसेवनाय च मुदा मुक्तोऽङ्कभूः कच्छपो
लेभे लाञ्छनतां स यच्छतु सतां श्रीसुव्रतो निर्वृतिम् ॥ २ ॥
आनन्दाय सुदर्शनाऽस्तु जगतां यस्या मुखेनाग्रतो
नम्राया मुनिसुव्रतक्रमनखादर्शप्रतिच्छन्दिना ।
आत्मद्वादशतां वहन्नहरहर्दैवो हिमांशुर्महा-
कल्पानल्पपतङ्गपाटवतिरस्कारे चकारोद्यमम् ॥ ३ ॥
रक्षादक्षो दिवि दिविषदां कोऽपि सन्ध्यासमाधिं
ध्यातुर्धातुश्चुलुकजलतः शौर्यराशिः पुरासीत् ।
प्रेङ्खत्खड्गप्रतिमितितया सम्मुखीनो बभूव
भ्रूसंरम्भत्रसदसुहृदो यस्य युद्धे य एव ॥ ४ ॥
वंशो विश्वत्रितयविदितः पर्वणां वेश्म तस्मा-
च्चौलुक्याख्यः समजनि समुन्मीलदौन्नत्यलीलः ।
तच्चूलाग्रस्मितसितयशश्चेलतानातिरेका-
देकच्छत्रामतनुत महीं मूलराजो महीन्दुः ॥ ५ ॥
कृत्वाऽधः कच्छपं सिन्धुराजप्रक्षोभशोभितः ।
अमन्दरोचितभुजोऽप्यभवद्यः श्रियः प्रियः ॥ ६ ॥
कीर्त्तिस्तोमसुधाभृतानि वसुधाखण्डानि रेजुः सुधा-
कुण्डानीव नवत्रिविष्टपसदां स्वाद्यानि यस्मिन्विभौ ।

रक्षानागचतुष्किका इव सदा सेवासमायातषट्-
त्रिंशद्राजकुलीयदक्षिणभुजव्याजेन येषां बभुः ॥ ७ ॥

तस्मादकल्मषमिलन्निजकीर्त्तिभूति-
शुभ्रीकृतां निजमहोदहनाक्षिदीप्ताम् ।
मूर्त्तिं हरस्य धरणीं रिपुराजमुण्डै-
श्चामुण्डराज इति राजयति स्म राजा ॥ ८ ॥

यत्खड्गवल्ली हरसिद्धिसिद्धरूपेव रेजे समराध्वरेषु ।
मृत्यून्मुखैः सादिभिर्यशोम्भः क्रीतं निजाङ्गक्षतजेन यस्याम् ॥ ९ ॥

भूवल्लभस्तदनु वल्लभराजदेवः
ख्यातः क्षितौ जगति यः स्मितविभ्रमाभिः ।
दृग्दामदामभिरपूजि कुरङ्गनाभिः
शृङ्गारदैवतधियेप्सितकान्तदाता ॥ १० ॥

स्वयं विनम्रेषु परेषु युद्धसिद्धैकचिन्ताचयचान्तनिद्रः ।
यः स्वप्नसङ्गैरपि बाहुदण्डकण्डूतिनिर्भेदमुदं न भेजे ॥ ११ ॥

तस्मादभूद्भूवलयस्य भूषा श्रीदुर्लभो दुर्लभराजराजः ।
यस्यासिसिन्धौ विनताभिरेत्य मग्नं महीभृत्कुलवाहिनीभिः ॥ १२ ॥

सुरस्त्रीणां नेत्रं सृजति निजरूपादनिमिषं
ध्रुवं तस्मिन् भस्मीकृतरिपुरभूद्भीमनृपतिः ।
यदुत्पाते जाते हुतभृतभियो भोजनृपते-
रुरः श्रीरास्यं गीः क्ष्मासिलतायुक्तममुचत् ॥ १३ ॥

यद्दानोदकजालसिन्धुपटलैः कीर्त्तिप्रभापाण्डुभिः
शत्रुस्त्रीजनसाञ्जनाश्रुसलिलस्रोतस्विनीभिः समम् ।
सम्भिद्यैव पदे पदे तनुमतामन्तः समन्तान्मुदं
तन्वद्भिर्जितगाङ्गयामुनजलैर्धात्री पवित्रीकृता ॥ १४ ॥

क्रामन्ति स्म यथा यथाम्बरपथान् यात्रासु यत्रावनी-
जैत्रे सर्पति दर्पतारतुरगक्षुण्णा रजोराजयः ।
पश्यन्तीव तथा तथा त्रिपथगातोयेऽपि विच्छायतां
शङ्के कीर्त्तिरगाद्धौतधवला दूरेऽतिदूरादपि ॥ १५ ॥

तस्माद्विस्मारितरतिपतिः कामिनामङ्गधाम्ना
नाम्ना कर्णः समजनि भुजाशालिनां मौलिरत्नम् ।

निन्द्यं वन्दिग्रहमपि निजं बह्वमन्यन्त मन्ये
धन्यम्मन्या रिपुयुवतयो यस्य रूपं निरूप्य ॥ १६ ॥
यदङ्गघटनोत्सृष्टैः परमाणुगणैरिव ।
विधिर्विधाय कन्दर्पं सदर्पां द्यामपि व्यधात् ॥ १७ ॥
सप्ततन्तुप्रपञ्चेन यस्तां कीर्त्तिपटीं व्यधात् ।
चतुर्दशापि विश्वानिच्छादयाञ्चक्रिरे यया ॥ १८ ॥
व्यजयत जयसिंहदेवभूपस्तदनु दिशश्चिदशप्रभुप्रभावः ।
यशसि यदसिधेनु दुग्धमुग्धैः श्रितमुडुभिर्दिवि दोहफेनसाम्यम् ॥ १९ ॥
तत्त्रैलोक्यनिभत्रिभूमिकगृहक्रोडस्फुरन्मालव-
क्ष्माभृत्कीर्त्तिनितम्बिनीमुखपरिक्षेपाय पांसूत्करम् ।
लीलालुप्तजगद्भयं खरखुरोत्खातक्षमामण्डल-
च्छिन्नैर्धारगलग्रहेऽपि तुरगा यस्य क्षणाच्चिक्षिपुः ॥ २० ॥
विश्वस्योपकृतिव्रतव्यतिकरैस्तैर्यशस्तेजसोः
सामान्यप्रतिपत्तिमप्यसुलभां लब्ध्वेन्दुतीव्रद्युती
काङ्क्षन्तौ चिरनन्दितामिव तयोरायुःप्रवृद्ध्यौषधीं
द्रष्टुं काञ्चन काञ्चनक्षितिधरोपान्तेऽपि तौ भ्राम्यतः ॥ २१ ॥
तत्कालं कलहे निहत्य किमपि प्रत्यायिताः शत्रवः
स्वर्गस्त्रीपरिरम्भणेऽपि न मनःस्वास्थ्यं समासेदिरे ।
यं कल्पान्तकृतान्तवक्त्रकुहराकारस्फुरत्कार्मुकं
पश्यन्तः प्रसरन्तमद्भुतभयावेशेन मीलद्दृशः ॥ २२ ॥
अवञ्चयन्नाशु कृपाणपातं विरोधिवीरानमनक्रियाभिः ।
यस्याङ्घ्रिपङ्केरुहवल्लवासां लक्ष्मीं च दक्षा रभसादगृह्णन् ॥ २३ ॥
स्वैरेव प्रहतैर्द्विपद्भिरमरीभूतैः सुरीभिः समं
गीतं प्रीतिरसैः स्वमेव हृपिते तस्मिन् यशः शृण्वति ।
क्ष्मां पाति स्म कुमारपालनृपतिर्यत्कीर्त्तिकालुष्यदं
तद्बाष्पाञ्जनकश्मलं न रुदतीवित्तं सवित्तोऽग्रहीत् ॥ २४ ॥
जैनं धर्ममुरीचकार सहसाऽर्णोराजमत्रासयद्
बाणैः कुङ्कणमग्रहीदपि गुरूचक्रे स्मरध्वंसिनम् ।
इत्थं यस्य परिक्षतक्षितिभृतो हंसावलीनिर्मलै
रामस्येव निरन्तरं नवयशःपूरैर्दिशः पूरिताः ॥ २५ ॥

तादृग्दानपरम्पराभिरभितो निष्काश्य कालं कलिं
त्रेताद्वापरयोरहम्प्रथमिकाबद्धस्पृहं पश्यतोः ।
श्रेयश्चन्दनतो विशेषकविधिं कृत्वा यशोजाह्नवी-
पाथोभिः कृतिना स्वयं कृतयुगो येनाभिषिक्तः क्षितौ ॥ २६ ॥
अजयदजयपालभूमिपालः क्षितिमथ मन्मथमञ्जुलेन येन ।
त्रिपुररिपुरपि प्रसूनबाणैरिव पिहितः सहसा यशःसमूहैः ॥ २७ ॥
अन्तर्धत्कीर्त्तिकासारं कृतस्नानस्य सर्वतः ।
लग्नफेनलवायन्ते तारागगनदन्तिनः ॥ २८ ॥
बालः श्रीमूलराजोऽथ क्रीडन्समराङ्गणे ।
द्विपद्रुमवितानानि समूलमुदमूलयत् ॥ २९ ॥
आपपे प्रकृतिसम्भ्रमेण यत्तेजसा रिपुयशःसुधारसः ।
तेन निर्गलितबिन्दुवृन्दवद् द्योतते वियति तारकाततिः ॥ ३० ॥
भूमीभारमथो बभार तनयः श्रीभीमदेवो विभु-
र्दानारम्भविजृम्भमाणविभवप्रागल्भ्यनजैयशाः ।
गीतो यत्तुलया विरोचनसुतः पातालवैतालिकै-
रर्थोत्तालमनोभिरन्वहमहङ्कारं चकार स्मितः ॥ ३१ ॥
यदाननसरोजेन नित्यस्मेरेण निर्जितः ।
सलज्ज इवामज्जत् यद्यशोजलधौ विधुः ॥ ३२ ॥
अर्णोराजाङ्गजातं कलकलहमहासाहसिक्यं चुलुक्यं
श्रीलावण्यप्रसादं व्यनसुत स निजश्रीसमुद्धारधुर्यम् ।
यस्य प्रत्येकधाराद्वयफलितभुजाभुग्नशाली रिपूणां
कीलालैः पीतवासा इव समिति चतुर्बाहुतामेति खड्गः ॥ ३३ ॥
तादृक्कम्पव्यतिकरभृतां सर्वतः पर्वतानां
व्यातन्वद्भिः क्षयसमयमरुत्पूरशङ्कातिरेकम् ।
यत्प्रत्यर्थिक्षितिधववधूवर्णनिश्वासवात-
व्रातोत्पातैरिव दिवि सदा भ्रेमुरर्केन्दुताराः ॥ ३४ ॥
भूभारोद्धृतिधुर्यदुर्धरभुजस्तस्याङ्गजन्मा स्फुर-
त्कीर्तिः श्रीधवलोऽस्ति वीरधवलोऽहङ्कारलङ्केश्वरः ।
यस्मिन्निस्यति मार्गणै रिपुगणं हृष्यन्ति तत्याङ्गनाः
कामोऽयं कुरुते मदेकवशगं चित्तेशमित्याशया ॥ ३५ ॥

विक्रीडतो यस्य नयप्रतापयशःकुमारौ जगदङ्गणान्तः ।
प्रभावभाजौ लसतस्तदङ्गरक्षासु दक्षाविव स्वराजौ ॥ ३६ ॥

पाताले बलिराजराज्यविशदे विश्वम्भरामण्डले
यल्लीलायितमङ्कुले सुरपुरे कल्पद्रुमुद्राङ्कपि ।
दारिद्र्येण भयद्रुतेन सहसा यद्वैरिवीराश्रया-
दभ्रान्तप्रसरेण शैलशिखरिक्रोडेषु विक्रीडितम् ॥ ३७ ॥

यस्मादिरम्भोदसहोदरश्रीः शौर्यं द्विपस्येव मदप्रवाहः ।
सर्पन्सदर्पारिनरेन्द्रकीर्त्तिकासारपूरं कलुषीचकार ॥ ३८ ॥

सचिवप्रवरं कञ्चित्प्रार्थितस्तेन पार्थिवः ।
श्रीमान् भीमो मुदा वाचमुवाच श्रवणामृतम् ॥ ३९ ॥

वाग्देवताचरणकाञ्चननूपुरश्रीः
श्रीचण्डपः सचिवचक्रशिरोऽवतंसः ।
प्राग्वाटवंशतिलकः किल कर्णपूर-
लीलायितान्यधित गूर्जरराजधान्याः ॥ ४० ॥

मतिकल्पलता यस्य मनःस्थानकरोपिता ।
फलं गूर्जरभूपानां सङ्कल्पितमकल्पयत् ॥ ४१ ॥

वाग्देवीप्रसादः सूनुश्चण्डप्रसाद इति तस्य ।
निजकीर्त्तिवैजयन्त्या अलयत गगनाङ्गणे गङ्गाम् ॥ ४२ ॥

पातालमूले पिहितांशुभासः पृथ्वीविभागेऽपि हराट्टहासः ।
स्वर्गेऽपि दुग्धाब्धिपयोविलासः कीर्तिर्यदीया त्रिजगत्युवास ॥ ४३ ॥

कीर्त्तिकदम्बलितपार्वणसोमः सोम इत्यजनि तस्य तनूजः ।
सिद्धराजगुणभूषणभाजः संसदो विशददर्पणकल्पः ॥ ४४ ॥

उत्कर्षप्रगुणां गुणागुणपरिज्ञानौचितीं मन्महे
तस्य प्रीतिरसादनन्यमनसा येनान्वहं सेविताः ।
देवस्तीर्थकृदेव केवलनिधिर्विद्यानिधानं गुरुः
सूरिः श्रीहरिभद्र एव गुणधीः सिद्धेश एवाधिपः ॥ ४५ ॥

सीताकुक्षिसरोवरैकवरलाकान्तोऽश्वराजाख्यया
तस्याभूत्तनुभूः सदापि जननीभक्तौ च यः पावनः ।
स्फूर्जज्जूर्जटिजूटकोटरपदन्यासोत्थपापच्छिदे
स्वर्नद्याऽपि समाश्रितः सितलसत्कीर्त्तिच्छविच्छद्मना ॥ ४६ ॥

सप्तलोकचरी सप्ततीर्थयात्रासमुद्भवा ।
गङ्गां जिगाय यत्कीर्त्तिर्विद्वत्त्रितयविस्तृताम् ॥ ४७ ॥

भैमीव नैषधमहीरमणस्य तस्य
कान्ता सती समजनिष्ट कुमारदेवी ।
यन्मानसे जिनपदाम्बुजभाजि शुद्ध-
पक्षद्वयः पतिरराजत राजहंसः ॥ ४८ ॥

श्रीमल्लदेव इति तत्तनुभूर्बभूव
यत्कीर्त्तिपूरशशिनो गगनाङ्कपीठे ।
स्पर्द्धोद्धुरं प्रकृतयोरिव साम्यदण्डं
स्वर्दण्डमेव विधिरन्तरयन्त दृष्टः ॥ ४९ ॥

विश्वेते द्वयविद्यौ तदनु तदनुजौ धीनिधी वस्तुपाल-
स्तेजःपालश्च तेजस्तरणितरुणिमस्फूर्त्तिरोचिष्णुमूर्त्ती ।
श्रीमन्त्रेतौ निजश्रीकरणपदकृतव्यापृती प्रीतियोगा-
त्तुभ्यं दास्यामि विश्वं जयतु नवनवं धाम तन्मन्त्रमित्रम् ॥ ५० ॥

इत्युक्त्वा प्रीतिपूर्णाय श्रीवीरधवलाय तौ ।
श्रीभीमभूभुजा दत्तौ वित्तमात्ममिवात्मजः ॥ ५१ ॥

अन्ये केचन रोचमानमतयो मन्त्रीश्वरा भास्करा
लप्स्यन्ते बत वस्तुपालसचिवाधीशेन साम्यं कुतः ।
सार्द्धं यल्लघुबन्धुनाऽपि दिविषद्वृन्दैकमान्यः स्वयं
सामान्यप्रतिपत्तिगौरवपदं वाचस्पतिर्वाञ्छति ॥ ५२ ॥

वीरश्रीवरधाम्नि वीरधवले सिंहारवान्मारवान्
जेतुं यानवति प्ररूढपुलकैरङ्कुरयन्पौरुषम् ।
यस्तीर्त्वा यदुसिंहसिंहणबलाम्भोधिं भुजक्रीडया
गर्जन्नर्जितवान् यशस्त्रिजगतीमुक्तालतामण्डनम् ॥ ५३ ॥

सम्पूर्णे भुवने घनेन रजसा श्रीतीर्थयात्रापरि-
स्यन्दिस्यन्दनवृन्दतारतुरगव्रातक्रमोत्पातिना ।
यत्कीर्त्तेः सह पांशुकेलिसुहृदो नन्दन्ति मन्दाकिनी-
दुग्धाम्भोधिविभावरीविभुककुप्कुम्भीन्द्ररुद्रादयः ॥ ५४ ॥

येनाऽकारि तमोनिकारि कलशालङ्कारि शत्रुञ्जय-
क्ष्माभृन्मण्डनमिन्द्रमण्डपमहो नाभेयभर्त्तुः पुरः ।

तेनैकां द्युधुनीं दधद्विमगिरिः पार्श्वस्थपार्श्वप्रभु-
श्रीमन्नेमिनिकेतकेतनयुगाभोगेन निर्भत्सितः ॥ ५५ ॥
यः शत्रुञ्जयशेखरं जिनगृहश्रीतारहारं स्खल-
त्ताराधोरणि तोरणं यदसृजत्तन्मूर्ध्नि लक्ष्मीः स्थिता ।
शङ्केऽभूदुदितद्विपक्षवदना नन्तुं समागच्छतो
नाभेयं प्रणिपत्य च प्रचलतो यस्यास्यवीक्षाशया ॥ ५६ ॥
श्रीशत्रुञ्जयशृङ्गसीम्नि सरसि प्राप्याम्बु यत्कारिते
नीचत्वाय सुधाकराय विबुधाः कुर्वन्ति नोपक्रमम् ।
इत्यूहं कृतिनोऽन्वहं विदधते कुन्दावदातद्युता
भास्वच्छाश्वतराकया जगति यत्कीर्त्या परीतेऽभितः ॥ ५७ ॥
येन व्यधाय्यत विधुद्युतिहारिवारी
श्रीपादलिप्तनगरीमुकुरस्तडागः ।
यद्यस्त्यगस्तिरिह कोऽपि तदेतु तन्या-
द्दोःस्फालनं मुहुरितीव महोर्मिभिर्यः ॥ ५८ ॥
अर्कपालितकग्रामे तेन तेनेऽद्भुतं सरः ।
यस्य निस्यन्दलेखेव पार्श्वे वहति वाहिनी ॥ ५९ ॥
येनोज्जयन्तगिरिमण्डननेमिचैत्ये
नाभेयपार्श्वजिनसद्मयुगं व्यधायि ।
अन्तःस्वयंघटितनाभिजनेमिनाथ-
श्रीस्तम्भनेशगृहमप्युदधारि हारि ॥ ६० ॥
स्वर्गं यद्गुरुचैत्यतोरणशिरः पद्यापदैः प्रापय-
द्वापीकूपतडागमार्गचलनैः पातालमूलं ययौ ।
सा यत्पौषधमन्दिरोदरवरारामप्रपामध्यभू-
विश्रामश्रयणेन भूमिमपि यत्कीर्तिर्मुहुर्गाहते ॥ ६१ ॥
यन्निर्मापितदेवमन्दिरशिरःकल्याणकुम्भप्रभा-
प्राग्भारैर्विदधे सदा सुदिवसं सर्वत्र धात्रीतले ।
दृश्यः शाश्वतिकस्तथा प्रसृमरश्यामच्छविच्छद्मना
यत्खड्गक्षतवैरिवामनयनावक्त्रेषु रात्रिक्षणः ॥ ६२ ॥
अस्थापयत्स्थिरमतिः शकुनीविहारे
संसारतारिलसदम्बडधर्मपुञ्जे ।

श्रीपार्श्ववीरजिनपुङ्गवयुग्मदम्भा-
ध्यो धार्मिकद्वयमिवाग्रिमधर्मबन्धुः ॥ ६३ ॥
तमेकदा करारोपभर्त्सितस्वर्णशेखरः ।
श्रीतेजःपालमन्त्रीशो मुदा ज्येष्ठं व्यजिज्ञपत् ॥ ६४ ॥
सुव्रतक्रमनमस्कृतिहेतोर्यातवान्भृगुपुरं प्रति सोऽहम् ।
काव्यमुज्ज्वलनयो जयसिंहसूरिरित्यपठदत्र मदग्रे ॥ ६५ ॥
तेजःपाल कृपालुधुर्यविमल प्राग्वाटवंशध्वज !
श्रीमन्नम्बडकीर्त्तिरिव वदति त्वत्सम्मुखं मन्मुखात् ।
आजन्मावधि वंशयष्टिकलिता भ्रान्ताऽहमेकाकिनी
वृद्धा सम्प्रति पुण्यपूर्ण भवतः सौवर्णयष्टिस्पृहा ॥ ६६ ॥
इत्युक्त्वा मम पञ्चविंशतिमितास्तेन स्वयं दर्शिता-
स्तस्मिन्सुव्रतधाम्नि देवकुलिकाः कल्याणकुम्भस्पृशः ।
ताः सौन्दर्यभृतोऽपि कान्तिनिधिभिः कल्याणदण्डैर्विना
सीमन्तैरिव सुभ्रुवो विदधते नान्तः सतां सम्मदम् ॥ ६७ ॥
आदेशं देव यद्येवं दत्से स्वच्छेन चेतसा ।
हैमदण्डानिमानत्र तदहं कारये स्यात् ॥ ६८ ॥
इत्यन्तःस्मितवस्तुपालसचिवादेशाल्लसत्तेजस-
स्तेजःपालमहामतिर्व्यरचयत्कल्याणदण्डानिमान् ।
प्रत्येकं हरहासहारिमहसो येषां शिखासु स्थिता
नृत्यन्ति प्रतिवासरं परिचलत्केतुच्छलात्कीर्त्तयः ॥ ६९ ॥
जुह्वन्पातकपादपैकदहने तीर्थेशधर्मे निजां
कर्मालीं न कति क्रतूनकृत स श्रीवस्तुपालानुजः ।
दण्डा यूपवदुच्चसुव्रतगृहक्ष्माभृद्भवायामभी
तत्तेनाम्बडमण्डलेश्वरयशःसिन्धौ समारोपिताः ॥ ७० ॥
दत्ते चेतसि सम्मदं सुकृतिनां तेनेयमुत्तम्भिता
चञ्चच्चारुमरीचिवीचिकलिता कल्याणदण्डावलिः ।
पूर्वोर्वीधरकुञ्जतः प्रसरता प्रातर्वियत्कानने
यत्रागत्य भियेव गोपतिगवीवृन्देन मन्दायते ॥ ७१ ॥
यावच्चण्डपगोत्रमण्डनमणेः कीर्त्तिर्वियद्वाहिनी-
हस्ता दिग्गजगर्जिताद्यविभवैर्व्योमाङ्गणे नृत्यति ।

दण्डास्तावदमी सुवर्णघटनाविभ्राजिनः केतन-
क्रीडत्किङ्किणिकारवव्यतिकरैः कुर्वन्तु गीतक्रमम् ॥ ७२ ॥
तेजःपालयशोविलासविशदश्रीणां दिशां कौतुक-
क्रीडामण्डपडम्बरं महदहो यावद्धात्यम्बरम् ।
तावन्नूतनजातरूपजनितः सोऽयं सत्तुस्तम्भन-
स्तम्भस्तोमसमानतां वितनुताद्दृण्डदण्डव्रजः ॥ ७३ ॥
स्वस्तिश्री व्योमदेशादुदयनतनुभूकीर्त्तिरुर्वीतले श्री-
तेजःपालं प्रसन्ना वदति मतिमतां वन्द्य ! नन्द्या सदायुः ।
येन त्वत्कृष्टहेमध्वजविततभुजा दुःषमादाहदूनां
लिम्पन्तीं ता मुहुर्मामिह जिनगृहिकास्त्वयशश्चन्दनेन ॥ ७४ ॥
मोहो द्रोहधियाऽधिरोहति रसं श्रीपुञ्जहृत्पञ्जरे
क्षिप्तो यः कलिकालकेलिविधुरो दक्ष ! त्वया रक्षितः ।
श्रीसोमान्वयवार्द्धिवर्द्धनकलासोम ! स्वयं निर्मलो
धर्मः प्रत्युपकारकर्मठतया स त्वां क्षितौ रक्षतु ॥ ७५ ॥
श्रीवस्तुपाल ! तव निस्तवनप्ररूढः
सत्त्वोपकारमतिसारणिसिच्यमानः ।
सत्पत्रपुण्यकुसुमः फलदोऽस्तु तुभ्य-
मव्याजविश्वसुहृदे जिनधर्मवृक्षः ॥ ७६ ॥
श्रीसुव्रतपदाम्भोजमधुव्रातमधुव्रतः ।
एतां प्रशस्तिमस्ताघां जयसिंहः कविर्व्यधात् ॥ ७७ ॥

# श्रीरङ्गविजयरचिता
# गूर्जरदेशराजवंशावली ।

[ रचनासंवत् १८६५ ]

श्रीगौतमगणधराय नमः ।

( १. प्रकीर्णकराजवंशाः )

प्रणम्य भारतीं भक्त्या निधाय हृदि सद्गुरुम् ।
श्रीमद्गूर्जरभूपानां नामानि कीर्त्यते मया ॥ १ ॥

[ पालकनृपः ]

वीरतीर्थपतिराप निर्वृतिं यत्र तत्र धरणीधरो निशि ।
पालकाह्वयनृपोऽजनि क्षितौ षष्टिवर्षमित (६०) राज्यपालकः ॥ २ ॥

[ नवनन्दभूपाः, पालकाश्च ]

नवानां नन्दभूपानां राज्यानीह महीतले ।
तेन नाम्नैकवंशेषु बभूवुः पालकान् पुनः ॥ ३ ॥

[ मौर्यचन्द्रगुप्तराजा, चाणक्यमन्त्री ]

तेषां राज्याब्दानि पञ्चपञ्चाशदधिकशतमितानि ( १५५ ) ।
चाणक्य-चन्द्रगुप्तौ तत्समये प्रवरबुद्धिधरौ ॥ ४ ॥

...ाष्टछता-मारकराजराजा भूपो बभूवाथ महान् गुणज्ञः ।
अष्टाधिकं तन् सशताब्दसंख्यं ( १०८ ) राज्यं विशालं प्रभुतासमेतम् ॥ ५ ॥

[ पुष्यमित्रनृपतिः ]

पुष्यमित्रनृपतिर्गुणाग्रणीर्भूपतिः प्रबलभाग्यवानभूत् ।
त्रिंशदब्धमित ( ३० ) राज्यसंभवां संपदं सुरसमां चकार सः ॥ ६ ॥

[ बलमित्र-भानुमित्रराजानौ ]

बलमित्र-भानुमित्रौ बभूवतुश्च राज्यधारकौ प्रवरौ ।
षष्ठ्यब्दप्रमितं ( ६० ) चैतयोः सुराज्यं च विज्ञेयम् ॥ ७ ॥

[ नरवाहनमहीपतिः ]

नरवाहननामाऽभूत् तत्पृष्ठस्थो महीपतिः ।
राज्यं चकार भूपीठे चत्वारिंशच्छरम्मितम् ( ४० ) ॥ ८ ॥

[ गर्दभिल्लभूपतिः ]

तत्पृष्ठस्थमहीपतिः समजनि श्रीगर्दभिल्लाभिधो
धैर्यौदार्यगुणैश्च संभृततनुः क्ष्मामण्डलाखण्डलः ।
राज्यं तेन कृतं त्रयोदशशरन्मानं ( १३ ) महीमण्डले
श्यामाचार्यसरस्वतीहरणतो राज्यं स्वहस्ताच्च्युतम् ॥ ९ ॥

[ शकराजा ]

गर्दभिल्लस्य पट्टस्थः शकराजा बभूव च ।
कृतं तेन शुभं राज्यं चतुरब्दप्रमाणकम् ( ४ ) ॥ १० ॥

चन्द्रश्च चन्द्रचन्द्रश्च तृतीयश्चाभिवर्द्धितः ।
अभिवर्धितश्चन्द्रश्च चन्द्राभिवर्धितः पुनः ॥ ११ ॥

[ विक्रमादित्यपृथ्वीपतिः ]

वीरमोक्षाच्च सप्तत्या युते वर्षचतुःशते ( ४७० ) ।
व्यतीते विक्रमादित्य उज्जयिन्यामभूदिति ॥ १२ ॥

सत्त्वसिद्धाग्निवेतालप्रमुखानेकदैवतः ।
विद्यासिद्धो मन्त्रसिद्धः सिद्धसौवर्णपूरुषः ॥ १३ ॥

धैर्यादिगुणविख्यातः स्थाने स्थाने नरामरैः ।
परीक्षाकषपाषाणनिःघृष्टसत्त्वकाञ्चनः ॥ १४ ॥

सम्मानैः श्रिया दानैर्नृणामखिलामिलाम् ।
कृत्वा ऽवत्सराणां स आसीत् कर्ता महीतले ॥ १५ ॥

षड्शीतिमितं (८६) राज्यं वर्षाणां तस्य भूपतेः ।
विक्रमादित्यपुत्रस्य ततो राज्यं प्रवर्तितम् ॥ १६ ॥

[ शालिवाहनभूपः ]
पञ्चत्रिंशद्युते भूपाद् वत्सराणां शतं गते (१३५) ।
शालिवाहनभूपोऽभूद् वत्सरे शककारकः ॥ १७ ॥

[ बलमित्रभूपतिः ]
तस्य राज्यमभूत् पूर्णं पञ्चाशत्प्रमिताब्दकैः (५०) ।
तत्पट्टे बलमित्रोऽभूत् तपस्वी विजितेन्द्रियः ॥ १८ ॥
कृतं तेन शुभं राज्यं शतवर्षप्रमाणकम् (१००) ।
बाणाष्टक-द्वे वर्षे (२८५) विक्रमाद्न्वितो नृपः ॥ १९ ॥

[ हरिमित्रभूपः ]
हरिमित्राभिधो भूप आखण्डलपराक्रमः ।
अभूत् तेन कृतं राज्यं गूर्जरे शरदां शतम् (१००) ॥ २० ॥

[ प्रियमित्रभूपतिः ]
प्रियमित्रस्ततो जज्ञे शरदीषु-वसु-त्रिके (३८५) ।
अशीतिवर्षप्रमितं (८०) तस्य राज्यं बभूव सत् ॥ २१ ॥

[ भानुमहीपतिः ]
भूमिभोक्ता ततो भानुर्भानुवत् तेजसाऽधिकः ।
दोर्दण्डमण्डलाक्रान्तः त्रिखण्डक्षोणीमण्डलः ॥ २२ ॥
ज्ञाता दाता नयी धर्मी विनयी स पराक्रमी ।
बाण-राग-युगे वर्षे (४६५) बभूव भूमिपाग्रणीः ॥ २३ ॥
द्विनवतिवर्षमितं (९२) राज्यं तेन कृतं महत् ।
तदग्रे भूभुजो जातास्तेषां संख्या प्रकथ्यते ॥ २४ ॥

[ आम-भोजादिराजानः ]
आम-भोजादिका भूपा बभूवुः सप्तसंख्यकाः ।
तेषां राज्यं च द्वि(? त्रि)शतं बाण-वेदाब्दसंयुतम् (२४५) (३४५) ॥

(२. चापोत्कटवंशः)

[ वनराजराजा ]
अब्दे युग्म-नभो-मदालयमिते (८०२) चापोत्कटो भूपति-
र्जातोऽभूद् वनराज इत्यभिमतो विद्वज्जनैराश्रितः ।
षष्ट्यब्दप्रमितं (६०) सुराज्यमखिलं भुक्तं च तेनातुलं
व्यक्तश्रीरणहिल्लपत्तनपुरं सन्निर्मितं भूतले ॥ २६ ॥

योगराजश्च तत्पट्टे अब्दे द्वि-रस-नवते (८६२) ।
पञ्चत्रिंशच्च वर्षाणि (३५) तेन राज्यं कृतं महत् ॥ २७ ॥

[ क्षेमराजनृपतिः ]
अथाङ्क-नागप्रमितेऽब्दकाले (८९७)
तत्पट्टगामी नृपतिर्बभूव ।
क्षेमाह्वयस्तस्य नृपस्य राज्य-
वर्षाणि षड्(पञ्च)विंशतिसम्मितानि (२६) (२५) ॥ २८ ॥

[ भूयडभूपः ]
युग्म-द्वि-नन्दप्रमिते (९२२) च वर्षे
तत्पट्टगो भूयडराजनामा ।
नन्दाधिका विंशतिरेकवाचा (२९)
नृपराज्यसंख्या कथिता कवीन्द्रैः ॥ २९ ॥

[ वयरसिंहभूपतिः ]
वयरसिंहनृपस्तदनु ह्यभूच्छशि-शराङ्कमिते (९५१) वरहायने ।
शर-कराब्दमिता (२५) च पदस्थिती(ति)रजनि तस्य सुगूर्जरदेशगा ॥ ३० ॥

[ रत्नादित्यमहीपतिः ]
रत्नादित्यमहीपतिस्तदनुगो रागाऽश्व-नन्दप्रमे (९७६) ।
वर्षे गूर्जरदेशमध्यविभूतां पाति स्म शक्रोपमः ।
सौभाग्यादिगुणैः सुसंभृततनुर्वर्षाणि राज्यं क्षमा-
पके पञ्चदश (१५) प्रवीणविदुषां सम्मानदानप्रदः ॥ ३१ ॥

[ सामन्तसिंहभूमिपतिः ]
सामन्तसिंह इति भूमिपतिर्विनीतो
भू-नन्द-नन्दमितहायनके (९९१) बभूव ।
राज्यं चकार रुचिरं वरगूर्जरान्ते
वर्षाणि सप्त (७) विबुधैः परिसेव्यमानः ॥ ३२ ॥
इत्थं सुचापोत्कटवंशभूपाः
सप्तार्चितुल्या विजितारिपक्षाः ।
एषां च वर्षाणि पदस्थितानां
शताधिकाः षण्णवतिः क्रमेण (१९६) ॥ ३३ ॥

(३. चौलुक्यवंशः)

[ मूलराजपृथ्वीपतिः ]
मूलराजस्ततो जज्ञे वसु-नन्दाङ्कहायने (९९८) ।
पञ्चपञ्चाशच्छरदां स्वच्छं राज्यं चकार सः ॥ ३४ ॥

... ... ... (१३) च हायनानि
पूर्णं चकार विविधानि सुखानि भुक्त्वा ॥ ३५ ॥

[ वल्लभराजनृपः ]

तत्पट्टगो वल्लभराजराजा
रागाङ्ग-शून्येन्दुमिते (१०६६) हि वर्षे ।
षण्मासपर्यन्तकृतं सुराज्यं
महौजसा तेन नृपेण पृथ्वी(व्याम्) ॥ ३६ ॥

[ दुर्लभराजभूपतिः ]

रसाङ्ग-शून्येन्दुमितेऽब्दके च (१०६६)
महीपतिर्दुर्लभराजनामा ।
एकादशाब्दप्रमितं च सार्द्धं (११॥)
राज्यं कृतं तेन नृपेण सम्यक् ॥ ३७ ॥

[ भीमराजभूपः ]

भीमराजनृपतिस्ततोऽब्दके
चाष्ट-सप्त-दशसम्मिते (१०७८) ह्यभूत् ।
नेत्र-नीरधिमिताब्दसंस्थिता (४२)
तस्य राज्यपदवी गरीयसी ॥ ३८ ॥

[ कर्णराजनृपः ]

श्रीकर्णनृपतिर्धरणीतलेऽस्मिन्
शून्य-द्वि-चन्द्र-शशिसम्मित(११२०)हायनेऽभून् ।
त्रिंशत्प्रमापरिमितं (३०) च सुराज्यमग्र्यं
शुद्धं दधार भुवि सद्गुणिनां गरिष्ठः ॥ ३९ ॥

[ सिद्धराजजयसिंहराजा ]

श्रीसिद्धराजजयसिंहनृपो बभूव
शून्येषु-भूमि-शशिसम्मितहायने (११५०) च ।
राज्यं चकार नव-वेदमिताब्द(४९)संख्यं
वापी-सरस्सु रचनादिविधिप्रवीणः ॥ ४० ॥

[ कुमारपालनृपतिः ]

नन्दाङ्क-चन्द्र-भूमिप्रमिते (११९९) वर्षे च तस्य पट्टेऽभूत् ।
राजा कुमारपालो जामेयः सिद्धराजस्य ॥ ४१ ॥

... महता प्रचण्डाखण्डशासनः ॥ ४२ ॥

पराक्रमेण दानेन धैर्येण दययाऽऽज्ञया ।
कीर्त्या गुण्यनुरागेण नयेन विनयेन च ॥ ४३ ॥

विज्ञानेन विवेकेन धर्मेण राजलीलया ।
सोऽद्वितीयो नृपो जज्ञे महासत्त्वोऽपि तैर्गुणैः ॥ ४४ ॥

एकादशशतानीभा रथास्तस्यायुतप्रमाः (१०,०००) ।
एकादशलक्षहयाः पत्त्यष्टादशलक्षकाः ॥ ४५ ॥

अष्टादशसुदेशेषु मारिव्यसनवारकः ।
सेनाचङ्क्रमपल्याणं स वर्षास्वकरोन्नृपः ॥ ४६ ॥

तस्य भूपस्य सचिवो निपुणो बाहडाह्वयः ।
धर्मकर्मसमायुक्तो देव-साधुप्रपूजकः ॥ ४७ ॥

[ कुमारपालमन्त्री बाहडः ]

श्रीमद्बाहडमन्त्रिणा भृगुपुरे श्रीलाटदेशाश्रिते
सत्पाषाणविनिर्मितं जिनपतेः स्वश्रेयसे मोक्षदम् ।
सद्गेहं मुनिसुव्रतस्य रुचिरं सूर्यारुणाब्दे (१२१२) वरे
राज्यं तेन कृतं पुरस्य सुखदो दुर्गोऽपि तेन कृतः ॥ ४८ ॥ ✓

एकत्रिंशद्वर्षमितं (३१) राज्यं कुमारभूभृतः ।
विपर्ययेन मरणं बभूव तस्य धीमतः ॥ ४९ ॥

[ अजयपालभूपः ]

अजयपालभूपोऽभूत् ख-त्रि-सूर्यमितेऽब्दके (१२३०) ।
राज्यं तस्य नृपस्याभूद्त्रि(३)हायनसंज्ञकम् ॥ ५० ॥

[ मूलराज (बाल) भूपतिः ]

तत्पट्टे मूलराजोऽभूत् त्रि-त्रि-सूर्यमितेऽब्दके (१२३३) ।
त्रिषष्टिवर्षपर्यन्तं (६३) तस्य राज्यं बभूव च ॥ ५१ ॥

इत्थं चौलुक्यवंशस्था नृपाश्चैकादश स्मृताः ।
तेषां च राज्यवर्षाणि त्रिशतप्रमितानि (३००) च ॥ ५२ ॥

(४. वाघेलावंशः)

[ वीरधवलनृपः ]

ततश्चाष्टाङ्क-सूर्याब्दे (१२९८) श्रीवीरधवलो नृपः ।
चकार दशवर्षाणि (१०) राज्यं न्यायप्रदं नृणाम् ॥ ५३ ॥

ज्ञातिभेदाः कृता याभ्यां विख्यातौ जगतीतले ॥५४ ॥

[ वीसलदेवनृपतिः ]

अष्ट-शून्य-विश्वमिते ( १३०८ ) काले वीसलदो नृपः ।
अष्टादशवर्षमिते ( १८ ) राज्यं चक्रे महामतिः ॥ ५५ ॥

वीसलनगरस्यैव स्थापना तेन निर्मिता ।
दर्भावत्यां कृतो दुर्गस्तत्काले जगदूरभूत् ॥ ५६ ॥

[ अर्जुनदेवभूपतिः ]

राजाऽर्जुनदेवनामा राम-द्वि-विश्वसम्मिते ( १३२६ ) ।
समयेऽभूत् तस्य राज्यं चतुर्दशशरत्मितम् ( १४ ) ॥ ५७ ॥

[ सारङ्गदेवभूपः ]

भूपः सारङ्गदेवोऽभूत् ख-चतुर्विश्वसम्मिते ( १३४० ) ।
समयेऽभूत् तस्य राज्यमेकविंशतिहायनम् ( २१ ) ॥ ५८ ॥

[ कर्णदेवराजा ]

श्रीकर्णदेवनृपतिर्बभूवक्ष्मविश्वके ( १३६१ ) ।
काले राज्यमभूत् तस्य सप्त( ७ )हायनसंख्यया ॥ ५९ ॥

अष्टाङ्ग-विश्वसमये ( १३६८ ) नृपविक्रमाच्च भूमण्डले यवनपुङ्गवभूपतीनाम् ।
भूपान् पृथोश्च वरगूर्जरदेशमध्ये राज्यं च पत्तनपुरे प्रबलं बभूव ॥ ६० ॥

(५. यवनवंशः)

[ खिदरशाहखिलचीनृपः ]

खिदरशाहखिलची यवनाग्रणीः
प्रवरगूर्जरसीम्नि समागतः ।
प्रथमतस्तदनुक्रमतोऽग्रजा
यवनपुङ्गवशक्तिकारिलाङ्गना ॥ ६१ ॥

खिदरशाहखिलची राज्यं त्रयस्त्रिंशत्समामितम् ( ३३ ) ।
चकार धरणीपीठे नवमासाधिकं महत् ॥ ६२ ॥

[ मुबारखशानृपः ]

तत्पट्टगो वरमुबारखशाभिधश्च
राज्यं च पञ्चदशवर्षमितं ( १५ ) चकार ।
श्रीविक्रमाद् द्वयविक्रशकमितेऽब्दके ( १४०२ ) च
सप्ताङ्कमाससहितं वरगूर्जरेशः ॥ ६३ ॥



...न-पद-कुमत ( १४१६ ) वष यवनशभूपतिर्जज्ञे ।
पञ्चाब्द( ५ )राज्यधारी हि शामुद्दीनखिरामाहः ॥ ६४ ॥

[ निर्मलशानृपः ]

शशि-कर-शकमितेऽब्दके ( १४२१ )
समये म्लेच्छाधिपश्च निर्मलशा ।
जज्ञे हय ( ७ ) मासेऽधिक-
वर्षमितं ( १ ) तस्य राज्यं च ॥ ६५ ॥

[ तहेमूलनृपतिः ]

शरद्द्वयब्धिद्व्यब्दे ( १४२२ ) समजनि तहेमूलनृपतिः
सुराज्यावस्थायां प्रबलतरभूपान् विजिगि( गी )षुः ।
शर्मानन्दुकं विभवविभुताया वरगृहं
त्रिकाब्दं ( ३ ) तद्राज्यं निखिलजनतानन्दजनकम् ॥ ६६ ॥

[ महम्मुदशानृपतिः ]

शर-कर-शकमितेऽब्दे ( १४२५ ) मम्मुदशा म्लेच्छपो हि संजज्ञे ।
मासत्रिकयुक्सप्तवर्षमितं ( ७ ) तस्य राज्यमभूत् ॥ ६७ ॥

[ बहाउद्दीननृपः ]

बहाउद्दीननृपस्तस्मात् संजज्ञे त्रि-त्रि-शककं ( १४३३ ) ।
समये तस्य राज्यं च त्रयोदशसमामितम् ( १३ ) ॥ ६८ ॥

[ अल्लावद्दीननृपः ]

अल्लावद्दीन् भूमिपतिस्त्रिवर्ष( ३ )राज्यधारकः ।
रस-वेद-शकमिते ( १४४६ ) काले विक्रमभूपतः ॥ ६९ ॥

[ रकीफिसानृपः ]

म्लेच्छाधिपस्ततो जज्ञे पत्तनेशरकीफिसा ।
नंसा( ? नन्दा )ब्धि-शकतुल्याब्दे ( १४४९ ) त्रि-कु( १३ )हायनराज्यभाक् ॥ ७० ॥

[ महलोल्लुधीनृपः ]

युग्म-राग-युग-चन्द्रसम्मिते ( १४६२ )
हायने च महलोल्लुधीश्च ।
युग्म( ? राग )-वेद( ४२ )( ४६ )मितहायनसंख्यं
तस्य राज्यमभवत् सुखप्रदम् ॥ ७१ ॥

आसीत् त्रि(शि)कन्दरनृपः प्रबलप्रतापी
अष्टाभ्र-बाण-शशिसम्मित(१५०८)वर्षकेऽभून् ।
त्रिंशत्प्रमाब्दमितकं (३०) च कृतं सुराज्यं
तेनेह गूर्जरतले नवमासयुक्तम् ॥ ७२ ॥

[ इभराइमनृपतिः ]

इभराइमहमभूपपट्टधरश्चाष्ट-राम-तिथिवर्षे (१५३८)।
जज्ञे च तस्य राज्यमष्टाब्दं (८) सप्तमाससयुक्तम् ॥ ७३ ॥

[ बाबरनृपतिः ]

रस-युग-शर-चन्द्रसम्मितेऽब्दे (१५४६)
यवनपतिर्भुवि बाबराख्यभूपः ।
समजनि वरसप्त(७)वर्षसंख्यं
हयमितमासयुतं कृतं च तेन ॥ ७४ ॥

[ हमाऊनृपः ]

हमाऊनृपतिर्जज्ञे त्रि-पञ्च-तिथिवर्षके (१५५३)।
दश(१०)वर्षावधिराज्यं कृतं तेन सुखप्रदम् ॥ ७५ ॥

[ शेरशानृपः ]

गुण-रस-शर-चन्द्रसम्मितेऽब्दे (१५६३)
यवनकुले नृपशेरशा बभूव ।
कर-रसमित(६२)मासं राज्यमङ्गे
रुचिरतरं स दधार भूमीपीठे ॥ ७६ ॥

[ सालिमशानृपः ]

अष्टाङ्ग-पञ्चेन्दुमितेऽब्दकेऽभूत् (१५६८)
सालिमशाभूमिपतिर्महौजाः ।
अष्टाब्दकं (८) वै नवमासयुक्तं
राज्यं चकारोत्तमसद्गुणाढ्यः ॥ ७७ ॥

[ पीरोजशानृपः ]

पीरोजशा मुद्गलसार्थनायकः
सप्ताश्व-पञ्चेन्दुमिते (१५७७) च हायने ।
तुरङ्ग(७)मासाधिकसप्तवर्षकं (७)
चकार राज्यं भुवि सौख्यकृन्नृणाम् ॥ ७८ ॥



मम्मुदालिनृपो नृपमुख्यः पञ्च-पर्वत-तिथिप्रमितेऽब्दे (१५८१)।
अब्दयुग्म(२)मितराज्यधरोऽभूद् गीत-नृत्यनिपुणो बलवाँश्च ॥ ७९ ॥

[ अभरायमहमनृपः ]

अभरायमहमनृपतिः सप्ताष्ट-शर-चन्द्रसम्मिते (१५८७) वर्षे ।
नवमासाधिकवर्षावधि(१) राज्यं तस्य भूपीठे ॥ ८० ॥

[ शिकन्दरनृपः ]

अष्टाष्ट-तिथिवर्षे (१५८८) समजनि पृथ्व्यां शिकन्दरो भूपः ।
हय(७)मासाधिकवाजि(७)प्रमिताब्दमितं कृतं राज्यम् ॥ ८१ ॥

[ हमाऊनृपतिः ]

बाणाङ्क-बाण-शशिसम्मित(१५९५)हायनेऽभूत्
पृथ्वीपतिर्गुणनिधिश्च पुनर्हमाऊः ।
राज्यं च तस्य नृपतेर्हय(७)मासयुक्तं
सप्ताब्दकं (७) यवनभूपतिवृन्दवन्द्यः ॥ ८२ ॥

[ अकब्बरनृपतिः ]

अकब्बरो म्लेच्छपतिर्बभूव
रामाभ्र-रागेन्दुमितेऽब्दके (१६०३) च ।
नाम द्वितीयं च जलालदींश्च
जज्ञे प्रसिद्धिं भुवि तस्य सम्यक् ॥ ८३ ॥
यो जीवाभयदानडिण्डिममिषात् स्वीयं यशोडिण्डिमं
षण्मासान् प्रतिवर्षमुग्रमखिलं भूमण्डलेऽवीवदत् ।
मेने धार्मिकतामधर्मरसिको म्लेच्छाधिपोऽकब्बरः
श्रुत्वा हीरमुखादनाविलमतिर्धर्मोपदेशं शुभम् ॥ ८४ ॥
सप्तमासाधिकं राज्यमेकपञ्चाशदब्दकम् (५१)।
अकब्बरस्य भूपस्य विज्ञेयं जगतीतले ॥ ८५ ॥

[ जिहांगीरनृपतिः ]

वेदेषु-राग-चन्द्रे (१६५४) म्लेच्छाग्रणीर्जिहांगीरः ।
द्वाविंशतिहायनकं (२२) राज्यं हयमासयुक् तस्य ॥ ८६ ॥

[ शाहजहाननृपः ]

रागाद्रि-राग-चन्द्रे (१६७६) समये शाहजाननृपतिर्जज्ञे ।
त्रयस्त्रिंशद्वर्षाब्दं (३३) राज्यं चक्रे महत्तरं जगति ॥ ८७ ॥

आरङ्गजेबनृपतिर्यवनाधिपश्च नन्दाश्र-सप्त-शशिसम्मित( १७०९ )हायनेऽभूत् ।
शास्ता समस्तनृपतीन् वरगूर्जरेशान् नेत्रेषु ( ५२ )वर्षमिति गम्यपरः प्रतापी ॥ ८८ ॥

[ बाहदुरनृपः ]

म्लेच्छाग्रिमो नृपतिर्बाहदुर( रो ) बभूव
चन्द्रागमे सप्त-कुमिते ( १७६१ ) शुभहायने च ।
वाजीभ-पत्ति-रथ-सैन्यपतिः प्रवीणः
शता( एका )ब्दकं( १ ) रुचिरराज्यपदं चकार ॥ ८९ ॥

[ फरुकशेरनृपः ]

राज्यं त्रिवर्ष( ३ )पर्यन्तं निश्चामिकं महीतले ।
गतं तत्पुष्टकं राज्यं फरुकशेरनृपस्य च ॥ ९० ॥
चतुः-षट्-सप्त-चन्द्रेऽब्दे ( १७६४ ) फरुकशेरनृपो बभौ ।
राज्यं पञ्चा( ५ )ब्दकं तस्य विज्ञेयं जगतीतले ॥ ९१ ॥

[ मम्मुदनृपः ]

नन्दाङ्काश्व-शशि( १७६९ )मितेऽब्दके च काले
भूपोऽभूद् यवनपतिश्च मम्मुदाह्वः ।
द्वात्रिंशच्छरदि( ३२ ) भवं च तस्य राज्यं
विख्यातं निखिलविभूति-कीर्त्तियुक्तम् ॥ ९२ ॥

[ अहम्मदनृपः, आलिमगिर–आलिगोर नृपौ च ]

अहम्मदो नृपस्तस्मादालिमगिराभिधः [ ...... ] ।
आलिघोरनृपस्तस्माद् बभूवुर्यवनोत्तमाः ॥ ९३ ॥


[ गूर्जरराजवंशावलीकर्ता रङ्गविजयः ]

श्रीविक्रमात् प्रवरगूर्जरभूपतीनां नामानि रङ्गविजयेन निबन्धितानि ।
बाणाङ्ग-पर्वत-शशिप्रमिते (१८६५) च वर्षे वारे गुरौ धवलफाल्गुणपूर्णिमायाम् ॥ ९४ ॥

[ रोमटनृपः, भगवन्तरायक्षात्रः ]


श्रीमद् रोमटयावनेन्द्रनृपतिर्दाता नयी वर्तते
तस्यादेशमवाप्य रङ्गविजयः श्रीमद्भृगूणां पुरे ।
क्षात्रश्रीभगवन्तरायवचनाद् भूपाभिधानान्यहं
हर्षेणाकरवं च गूर्जरभवान्याकर्ण्य संदर्भतः ॥ ९५ ॥

इति श्रीगूर्जरदेशनिर्मितराज्यस्थितानां नामानि निबन्धितानि
पं० रङ्गविजयगणिना ।


अनंत
जनार्दन
हरजी [कर्ता: योगिनी दशा]
पुरुषोत्तम
बलभद्र (पत्नी नाकु)
विश्राम [कर्ता. यंत्रशिरोमणि]
याज्ञिकनाथ [कर्ता. जातक चंद्रीका]
शिवराम शुक्ल

# रैक्व ज्ञाति

## माधव भट्ट



Stone inscription in Sarva-jita Prāsāda.

Ref. NO. 6

॥ ई० ॥ ॐ नमः ॥ पातिशाहि श्री श्री श्री श्री श्री अकबर-
जलालदीनप्रदत्तबहुमान जगद्गुरु श्री श्री श्री श्री श्री श्री श्री हीरविजय-
सूरीश्वरपादानां पट्टप्रभावकेभ्यो भट्टारक श्री श्री श्री श्री श्री विजयसेन-
सूरिगुरुभ्यो नमः ॥

श्रेयस्संततिसिद्धिकारिचरितं सर्वेऽपि यं योगिनो
ध्यायंति स्थिरताप्रपन्नमनसो वेधांतरासं क्रमात् ।
श्रीनाभिनंदनसुरनरश्रेणीसमासेवितो
देयान्निर्मितभक्तियुक्तमनसो मुख्यानि सौख्यानि सः ॥ १ ॥
श्रीवर्द्धमानस्य बभूव पूर्वं पूर्वादिकल्पट्टधरः सुधर्मा ।
गतोऽपि सिद्धिं तनुते जनानां साहाय्यकं यः प्रतिधर्ममार्गम् ॥ २ ॥
ततोऽपि पट्टे नवमे बभूवुः श्रीसूरयः सुस्थितनामधेयाः ।
येभ्यः क्रियाज्ञानगुणाकरेभ्यो गच्छोऽभवत् कोटिकनामतोऽयम् ॥ ३ ॥
ततो ये वज्रशाखायां कुले चांद्रेऽत्र सूरयः ।
तेषां प्रभावं प्रत्येकं वक्तुं शक्नोति कः सुधीः ॥ ४ ॥
पट्टे युगाब्धिप्रमिते क्रमेणाभवन् जगच्चंद्रगणाधिपास्ते ।
येषां सदा चाम्लतपोविधानात् तपा इति प्राग् बिरुदं तदाभूत् ॥ ५ ॥
तेषां वंशे क्रमतस्तपःक्रियाज्ञानशुद्धिपरिकलितः ।
रसबाणमिते पट्टे संजातः सुविहितोत्तंसः ॥ ६ ॥
आनंदविमलसूरिः श्रुतोऽपि चित्ते करोति मुदमतुलाम् ।
कुमतांधकूपमग्नं स्वबलाज्जगदुद्धृतं येन ॥ ७ ॥
तत्पट्टे महिमभर (?) ख्याताः श्रीविजयदानसूरीशाः ।
येभ्यः समस्तविधिना प्रससार तपागणः सम्यक् ॥ ८ ॥
तेषां पट्टे प्रकटाः शांतरसापूर्णहृदयकासाराः ।
श्रीहीरविजयगुरवः प्रभवोऽभुवंस्तपागच्छे ॥ ९ ॥
साहिश्रीमदकब्बरस्य हृदयो व्यंयः पुरोरोपितः
संसिक्तो विचयैर्वचोमृतरसैः कारुण्यकल्पद्रुमः ॥
दत्तेऽद्यापि कलान्यमारिपटहोद्घोषादिकानि स्फुटं
श्रीशत्रुंजयतीर्थमुक्तकरतासन्मानमुख्यानि च ॥ १० ॥
तेषां पट्टप्रकटनहंसाः श्रीविजयसेनसूरिवराः ।
संप्रति जयंति वाचकबुधमुनिगणसंघपरिकरिताः ॥ ११ ॥
तर्कव्याकरणादिशास्त्रनिविडाभ्यासेन गर्वोद्धुराः
ये कूर्चालसरस्वतीति बिरुदं स्वस्मिन् वहंतेऽनिशम् ।
वाचोयुक्तिभिरेव यैः स्फुटतरं सर्वेऽपि ते वादिनः
साहिश्रीमदकब्बरस्य पुरतो वादे जिताः स्वौजसा ॥ १२ ॥
तेषां चरणसरोरुहां मकरंदास्वादलालसः सततम् ।
संघो जयतु चतुर्धा भूयांसि महांसि कुर्वाणः ॥ १३ ॥

इतश्च—

गूर्जरमंडलमंडनमभयं वडनगरमस्ति तत्रासीत् ।
नागरलघुशाखायां भद्रसिआणाभिधे गोत्रे ॥१४॥
गांधिकदेपाल इति प्रसिद्धनामा सुधर्म्मकर्म्मरतः ।
तत्सुतअलुआ–ह्वानस्तस्य सुतो लाडिकाभिधया ॥१५॥
पत्तीति धर्म्मपत्नी शीलालंकारधारिणी तस्य ।
तत्कुक्षिभुवौ बाडुक–गंगाधरनामकौ तनयौ ॥१६॥
तत्रापि बाडुआख्यः सुभाग्यसौभाग्यदानधर्मयुतः ।
धैर्यौदार्यसमेतो जातो व्यवहारिगणमुख्यः ॥१७॥
आद्यास्य पोपटीति च हीरादेवी द्वितीयका भार्या ।
ताभ्यां वराननाभ्यां सुतास्त्रयः सुपुविरे सुगुणाः ॥१८॥
आद्यसुतः कुंवरजीति नामा, सुपात्रदानेषु रतो विशेषात् ।
मार्गप्रवृत्तेर्गुणसंग्रहाच्च पितुर्यशो वर्धयति प्रकामम् ॥१९॥
जातो परस्यानश्च धर्मदासः सुवीरदासश्च सुतौ वरेण्यौ ।
अथान्यदार्थार्जनहेतवेऽसौ स्थानांतरान्वेषणमानसोऽभूत् ॥२०॥
श्रीस्तंभनाधीशजिनेशपार्श्वप्रसादसंपादितसर्वसौख्यम् ।
त्रंबावतीति प्रतिनामधेयं श्रीस्तंभतीर्थं नगरं प्रसिद्धम् ॥२१॥
स बाडुआख्यः स्वसुखाय तत्र वसन्ननेकैः सहबन्धुवर्गैः ।
सन्मानसंतानधनैर्यशोभिर्दिने दिने वृद्धिमुपैति सम्यक् ॥२२॥
श्रीहीरसूरेरुपदेशलेशं निशम्य तत्त्वावगमेन सद्यः ।
मिथ्यामतिं यः प्रविहाय पूर्वां जिनेंद्रधर्म्मे दृढवासनोऽभूत् ॥२३॥

पापप्रयोगविरतस्य गृहे समस्ता भेजुः स्थिरत्वमचिरादपि संपदा याः ।
पूर्वार्जितप्रबलपुण्यवशेन तस्य सन्यायमार्गसुकृतानुमतप्रवृत्तेः ॥२४॥
स धर्मसाधर्मिकपोषणेन मुमुक्षुवर्गस्य च तोषणेन ।
दीनादिदानैः स्वजनादिमानैः स्वसंपदस्ताः सफलीकरोति ॥२५॥
इतश्च—
शत्रुंजयख्यातिमथो दधानं कावीति तीर्थं जगति प्रसिद्धम् ।
काष्टेष्टकामृन्मयमत्र चैत्यं दृष्ट्वा विशीर्णं मनसेति दध्यौ ॥२६॥
दृढं भवेच्चैत्यमिदं यदीह कृतार्थतामेति ममापि लक्ष्मीः ।
अर्हद्वचोवासितमानसस्य मनुष्यतायां फलमेतदेव ॥२७॥
ततः श्रद्धावता तेन भूमिशुद्धिपुरस्सरम् ।
कावीतीर्थे स्वपुण्यार्थं श्रीनाभेयजिनेशितुः ॥२८॥
नंदवेदरसैणांकमिते संवत्सरे [१६४९] वरे ।
स्वभुजार्जितवित्तेन प्रासादः कारितो वरः ॥२९॥
सारसारस्वताद्गाररंजितानेकभूधवैः ।
श्रीमद्विजयसेनाख्यसूरिराजैः प्रतिष्ठितः ॥३०॥
मूलस्वामी जिनपतियुगादीश्वरो यत्र भास्वद्
द्वापंचाशत्त्रिदशकुलिकासंयुतः पुण्यसत्रम् ॥
उच्चैरभ्रंलिहशिखरसत्तोरणैरंचितश्रीः
प्रासादोऽयं धरणिवलये नन्दतादाशशांकम् ॥३१॥
श्रीयुगादिजिनाधीशप्रासादेन पवित्रितः ।
ग्रामोऽपि वर्द्धतामेष सुखसंपत्तिभिश्चिरम् ॥३२॥
॥ इति प्रशस्तिः ॥

अथेह श्रीगूर्जरमंडले वडनगरवास्तव्य नागरज्ञातीय लघुशाखायां भद्रसिआणागोत्र मुख्य गां० लाडिका भा० पत्ती सुतेन गां० बाडुआख्येन कुंवरजी धर्मदास वीरदासाख्य सुतत्रययुतेन संवत् १६४९ वर्षे मार्ग शुदि १३ सोमवारे स्वभुजार्जित बहुद्रव्यव्ययेन कावीतीर्थे स्वपुण्यार्थं सर्वजिन्नामा श्रीऋषभदेवप्रासादः कारितः । प्रतिष्ठितश्च तपागच्छे भट्टारकपुरंदर श्रीहीरविजयसूरिपट्टमहोदयकारिभिः श्रीविजयसेनसूरिभिश्चिरं नंदतात् ॥ श्रीरस्तु ॥

Inscription at the pādukā of Lord Ādinātha.

Ref- NO · 7

॥९०॥ अलाई ४५ सं० १६५६ वर्षे वैशाख शु० ७ बुधे
स्तंभतीर्थवास्तव्य वृद्धनगरीयलघुशाखा नागरज्ञातीय गां० अलुआ
सुत गांधी लाडिका भार्या पती सुत गांधी बाहुआ भार्या हीरादे सुत
गां० कुंअरजी गां० धर्मदास गां० वीरदासाभिधानैः । श्रीआदिनाथ-
पादुका कारिता प्रतिष्ठिता च सकलसूरिशिरोमणिभट्टारक श्री ५ श्रीआणंद-
विमलसूरिपट्टालंकार भट्टारक श्री ५ श्रीविजयदानसूरीश पट्टप्रतिष्ठसुवि-
हितसूरीश्वरगुणगरीष्ट । साहि श्रीअकब्बरभूपालप्रदत्त जगद्गुरुबिरुद
विराजमानतदनु [illegible] तपागच्छाधिराज श्री ५ श्री । हीरवि-
जयसूरिपट्टेंदु साहिश्रीअकब्बरसभाप्राप्तजयवाद । वार्त्त सवाइजगद्गुरु-
बिरुद श्री ५ श्रीविजयसेनसार्वभौमैरिति मंगलं ॥

## Inscriptions under the image of Lord Mahāvira and Lord Ādinatha.

No : 8

१.-श्रीमहावीरबिंबं प्रतिष्ठितं तपागच्छे भट्टारक श्रीविजयसेनसूरि-
भिरिति भद्रम् ॥ श्री

२. श्रीआदिनाथबिंबं श्रीविजयसेनसूरिभिः ॥

## Stone inscription on the temple of Lord Dharmanātha.

No. 9

॥र्द०॥ पातिसाह श्रीश्रीश्रीश्रीश्रीश्री अकब्बर जलालदीन विजय-
राज्ये । गरासीया राठोड श्रीश्रीश्रीश्री प्रतापसिंघ श्रीखंभायतवास्तव्य ।
लघुनागरज्ञातिय । गांधी । वाछुआ सुत कुंअरजीकेन श्रीधर्मनाथप्रासादं
कृतः । उपरि सेठ पीतांबर वीरा तथा से । शिवजी वोरा । गजधर
उविश्वकर्माज्ञातीय श्रीराजनगरवास्तव्य । सूत्रधारसताउतवीरपाल । सलाट-
सूत्र भाणा । गोरा । देवजी । संवत १६५४ वर्षे । श्रावण वदि ९ वार
शनौ । स्वभुजार्जित बहुद्रव्यव्ययेन श्रीकावीतीर्थे स्वपुण्यार्थं रत्नतिलका
नाम्ना बावनजिनालय सहितःप्रासादः कारितः ॥ लि । पं । ज्ञानेन । श्रीः

## Inscription under Lord Dharmanātha.

No - 10 A.

" अलाइ ४४ संवत् १६५५ व० मार्ग० सु० ५ गुरौ श्रीधर्म-
नाथ बिं० प्र० च अन्यतीर्थीयपरिचितायामपि पातशाहश्रीअकब्बर नर
चक्रवर्तिसभायां जिनशासनव्यवस्थापनेन जगत्प्रसिद्धजयवादिभिः
श्रीविजयसेनसूरिभिः तपागच्छे ॥ "

## Inscription under Lord Dharmanātha.

No - 10 -B.

" अलाई ४५ सं० १६५६ वर्षे वैशा० सु० ७ गु० स्तंभ-
तीर्थवास्तव्य, लघुशाखायां गांधी ब्रलुआ सु० गां० कहानजीकेन
श्रीधर्मनाथपरिकरः कारितः प्रतिष्ठितश्च तपागच्छे भट्टारकश्री पू श्रीविजय-
सेनसूरिभिः ॥ "

## Inscription under Lord Shantinātha and Lord Sambhavanātha.

No . 10 C

" श्रीशांतिनाथं बिंबं प्रतीष्टतं च श्रीवजयसेनसूरिभी ॥ "
" श्रीशंभवनाथ बंबं प्रतीष्टतं च श्रीवजयसेनसूरिभी ॥ "

Chronological inscriptions on Metal Images of both the temple.

Ref- No. 11

१. सं० १३५० वै० वदि ५ शुक्रे श्रे० धणपाल भा० देइ (?) पुत्र श्रे० पादाकेन पितुः श्रेयसे श्रीशांतिनाथबिंबं कारितं प्र० श्रीनन्नसूरिभिः क० ग० ( કવલા ગચ્છે )

२. संवत १५३१ वर्षे माह वदि ८ सोमे प्राग्वाटज्ञातीय सं० नेरा भा० गोरी सुत भोजाकेन भा० चांइसुत रांडादिकुटुंबयुतेन स्वश्रेयसे श्रीशांतिनाथबिंबं कारितं प्रतिष्ठितं श्रीतपागच्छे श्रीलक्ष्मीसागरसूरिशिष्य-श्रीसोमजय० सूरिभिः ॥

३. संवत १५३५ माघ सुदि ९ सोमे प्राग्वाटज्ञातीय। सं० रामा भा० हेमाइ नाम्ना पंचन्युथापनं प्रतिमापंचकं कारापितं श्रीशांति-नाथबिंबं प्रतिष्ठितं श्रीउदयसागरसूरिभिः ॥ ( પંચતીર્થી )

४. सं. १५४१ वर्षे वैशाख वदि ५ गुरौ गंधारवास्तव्य श्रीश्री-मालज्ञातीय श्रे० हेमा भा० पकू सु० पासवीर सचवीराभ्यां भा० रणकाइ सु० वर्द्धमानादिकुटुंबयुताभ्यां स्वश्रेयसे श्रीश्रेयांसबिंबं का० प्र० श्रीवृद्धतपापक्षे श्रीज्ञानसागरसूरिपट्टे श्रीउदयसागरसूरिभिः ॥

५. संवत् १५४३ वर्षे वैशाख वदि वायडाज्ञातीय मं०-गणीया भा० अकू सुता शाणीनाम्न्या स्वश्रेयसे स्वसरकुले भ० श्रे० वूघा श्रीआदिनाथबिंबं कारितं आगमगच्छे श्रीअमररत्नसूरीणामुपदेशात् प्रति-ष्ठितं च देकावाडावास्तव्यश्री ॥

Inscription on Mūla Nāyak.

Ref. No. 12

મૂળનાયકનો લેખ—

"संवत् इलाही ४८ संवत् १६५९ वैशाख वदि ६ गुरौ श्री-गंधारबंदिरे समस्तसंघेन स्वश्रेयसे श्रीपार्श्वनाथबिंबं कारापितं प्रति-ष्ठितं च तपागच्छे भट्टारक श्रीहीरविजयसूरिपट्टप्रभाकरसुधाकर भट्टारकपरंपरापुरंदर चव्वनचातुरीचमत्कृतचित्त सकलमेदिनीमण्डला-खंडल साहिश्री अकबरदत्त बहुमान समस्त सुं० ह० हितावतंस भट्टा-रक परंपराएश्विनी प्राणप्रिय-भट्टारक श्रीविजयसेनसूरिभिः ॥"

Inscription under Metal image.

Ref. No. 13

१. संवत् १५१२ वर्षे वैशाख वदि २ शुक्रे श्रीगुर्जरज्ञातीय सा० मुहुणसी सुत सा० जेसिं भा० जसमादे सुत सा० समधरेण स्वश्रेयसे श्रीअभिनंदनबिंबं का० प्र० श्रीचैत्रगच्छे श्रीगुणदेवसूरिसंताने श्रीजिनदेवसूरिपट्टे भ० रत्नदेवसूरिभिः [illegible] ॥

२. संवत् १५२२ वर्षे पोष वदि १ गुरु(रौ) श्रीश्रीमालज्ञातीय पितृ सिद्धराज [illegible]तु(तृ) जानुश्रेयोर्थं सुत [illegible]रहीयाकेन श्रीश्रेयांसनाथबिंबं कारितं। श्रीपूर्णिमा ५ श्रीसाधुरत्नसूरिपट्टे श्रीसाधुसुंदरसूरीणामुपदेशेन प्रतिष्ठितं वेगदीयाग्रामे ॥

३. सं० १५२५ वर्षे ज्येष्ठ वदि १ शुक्रे श्रीश्रीमालज्ञातीय वि० लुभा भार्यारत्न सुत लाडण आसा पेथाकौ भार्या वाउ झांझु प्रमुख कुटुंबयुतैः स्वश्रेयसे श्रीशांतिनाथबिंबं कारितं प्रतिष्ठितं श्रीज्ञानसागर-सूरिभिः वृद्धतपापक्षे ॥

४. संवत् १५४२ वर्षे वैशाख सु० २ गुरौ श्रीश्रीमाल सु० हेमा भा० पल्हाइतया श्रीविमलनाथबिंबं स्वश्रेयसे कारितं आगमगच्छे श्रीजिन[illegible]सूरिस्तत्पट्टे श्रीजिनचंद्रसूरिभिः प्रतिष्ठितं शुभं भवतु ॥

५. संवत् १५५१ वर्षे पोष वदि ५ गुरौ श्रीश्रीमाल ज्ञा० सा० वाछा भा० अनकू सुत सा० कान्हा भार्यया श्रीमंगाइनाम्न्या स्वभर्तृ-श्रेयसे श्रीसुमतिनाथबिंबं सद्गुरूणामुपदेशेन कारितं प्रतिष्ठितं च विधिना श्रीस्तंभतीर्थनगरे ॥

६. सं० १५८४ वर्षे चैत्र व० ९ सोमे आमलेश्वर वा० ल० श्रीमा० ज्ञा० जिनधर्मनैष्ठिको नगरश्रे० सदा भा० नाथीपुत्र संघमुख्य श्रे० वर्द्धमान भा० लखीनाम्न्या भा० श्रे० डूंगर श्रे० जना श्रे० हासादियुतेन पुत्रपौत्रपौत्र्यादि कुटुंबसहितेन स्वश्रेयोर्थं श्रीश्रेयांस चतु० का० प्र० तपागच्छे श्रीहेमविमलसूरिस्तत्पट्टे श्रीसौभाग्यहर्षसूरिवरैः ॥